**स्मर** पु० स्मरति प्रियमनेन स्मृ-करणे अप्। १कामदेवे अमरः। भावे अप्। २स्मरणे। [त्रिका०

**स्मरकूपक** पु० स्मरस्य कूप इव कायति कै-क। कामगृहे

**स्मरगृह** न० स्मरस्य गृहमिव। १स्त्रीचिह्नभेदे भगे जटा०। स्मरमन्दिरादयोऽप्यत्र।

**स्मरचक्र** पु० "धृत्वा वामकरेणोरुं स्वपादस्योपरिस्थितम्। दृढञ्च रमते कामी स्मरचक्रः प्रकीर्त्तितः" स्मरदीपकोक्ते रतिबन्धभेदे।

**स्मरण** न० स्मृ-ल्युट्। ज्ञातवस्तुनोऽनुभवाधीनसंस्कारजन्ये उद्बोधकसहकारेण जायमाने १ज्ञानभेदे स्मृतिशब्दे दृश्यम्। आध्याने हेमच०। २चिन्तने जटा०। ३अर्था-लङ्कारभेदे सा० द० अलङ्कारशब्दे ४०७ पृ० दृश्यम्।

**स्मरदशा** स्त्री स्मरकृता दशा। कामिनां स्मरकृतासु अङ्गा-सौष्ठवादिषु दशसु दशासु।

"अङ्गेष्वसौष्ठवं तापः पाण्डुता कृशताऽरुचिः। अधृतिः स्यादनालम्बस्तन्मयोन्मादमूर्च्छनाः। मृतिश्चेति क्रमाज्ज्ञेया दश स्मरदशा इह। असौष्ठवं मलापत्तिस्तापस्तु विरहज्वरः। अरुचिर्वस्तुवैराग्यं सर्वत्रारागिताऽधृतिः। अनालम्बनता चापि शून्यता मनसः स्मृता। तन्मयं तत्प्रकाशो हि बाह्याभ्यान्तरतस्तथा। रसविच्छेदहेतुत्वात् मरणं नैव वर्ण्यते। वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याददूरतः" इति सा०द०।

**स्मरध्वज** न० ६त०। स्त्रीचिह्ने शब्दर०। २वाद्ये पु० हेमच०

**स्मरप्रिया** स्त्री ६त०। स्मरभार्य्यायां रतौ जटा०।

**स्मरलेखनी** स्त्री स्मरस्य लेखनीव। स्वरेण कामोद्दीपके शारिकाख्ये शब्दर०। [याम् राजनि०।

**स्मरवीथिका** स्त्री स्मरस्य वीथिकेव प्राप्तिहेतुत्वात्। वेश्या-

**स्मरवृद्धि** पु० स्मरस्य वृद्धिर्यस्मात्। १कामवृद्धिक्षुपे राजनि० ६त०। २कामवृद्धौ स्त्री। [शब्दर०।

**स्मरस्तम्भ** पु० स्मरस्य तद्व्यापारस्य स्तम्भ इव। उपस्थे

**स्मरसख** पु० स्मरः सखा यस्य। गर्दभे त्रिका०।

**स्मरहर** पु० स्मरं हरति नाशयति हृ-अच्। १महादेवे अमरः। स्मरमर्द्दनादयोऽप्यत्र।

**स्मराङ्कुश** पु० स्मरं तत्कार्य्येऽङ्कुश इव उत्तेजकत्वात्। नखे शब्दर० नखाघातेन हि स्त्रीणां स्मरोद्दीपनं प्रसिद्धम्।

**स्मराम्र** पु० स्मरप्रिय आम्रः। राजाम्रे राजनि०।

**स्मरासव** पु० स्मरोद्दीपक आसव इव। लालायाम् त्रिका० कामिनां लालापाने हि स्मरोद्दीपनात्तस्यास्तथात्वम्।

**स्मार्त्त** त्रि० स्मृतौ विहितः, स्मृतिं वेत्त्यधीते वा अण्। १स्मृतिविहिते दानादौ "अन्योऽपि स्मार्त्तमाचरेत्" इति "स्मार्त्तं वैदिकवत् चरेत्" च स्मृतिः। २स्मृतिशास्त्राभिज्ञे च

**स्मि (षि)** अनादरे सक० विस्मये अक० चु० आ० सेट्। स्मापयते असिष्मपत। अयं षोपदेश एव। अन्यतो विस्मये स्माय-यतीत्येव। अयं भ्वादिरपि अनिट्। स्मयते असेष्ट [ति असिष्मियत् त विस्मये षोपदेशत्वात् षत्वम्।

**स्मिट** अनादरे सक० स्नेहे अक० चु० उभ० सेट्। स्मेटयति।

**स्मित** न० स्मि-भावे क्त। १ईषद्धास्ये अमरः "सुखं विकसित-स्मितम्" मालतीमाधवम्। कर्त्तरि क्त। २विकसिते ३ईषद्धास्यान्विते च त्रि०।

**स्मील** निमेषणे भ्वा० पर० सक० सेट्। स्मीलति अस्मीलीत्।

**स्मृ** स्मरणे भ्वा० प० अनिट्। स्मरति अस्मार्षीत् सस्मार सस्मर्त्ति। अषोपदेशत्वान्न षत्वम्। एतद्योगे कर्म्मणि षष्ठी। अयमीतस्यार्थे सक० घटा० स्मरयति।

**स्मृत** त्रि० स्मृ-क्त। १कृतस्मरणे २स्मृतिविषये च।

**स्मृति** स्त्री स्मृ-क्तिन्। अनुभूतवस्तुन उद्बोधकसहकारेण संस्काराधीने १ज्ञानभेदे। स्मर्य्यते वेदधर्मोऽनेन करणे क्तिन्। २धर्मसंहितनशास्त्रे वेदार्थानुभवजन्ये वेदार्थानु-वादके मुनिप्रणीते वाक्यरूपे शास्त्रे। "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्" मनुः।

ज्ञानभेदस्मृतेर्लक्षणादिकं पात० सू० भा० विवरणे-सूक्तम् उक्तं यथा

"अनुभूतविषयाऽसंप्रमोषः स्मृतिः" सू०। "किं प्रत्ययस्य चित्तं स्मरति। आहोस्वित् विषयस्येति। ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासः तथाजातीयकं संस्कारमारभते स संस्कारः स्वव्यञ्जकाञ्जनं तदाकारमेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति। तत्र ग्रहणाकारपूर्वा बुद्धिः ग्राह्याकारपूर्वा स्मृतिः। सा च द्वयी, भावितस्मर्त्तव्या चाभावितस्मर्त्तव्या च स्वप्ने भावितस्मर्त्तव्या जाग्रत्समये त्वभावितस्मर्त्तव्येति। सर्वाः स्मृतयः प्रमाणविपर्य्ययविकल्पनिद्रास्मृतीनामनुभवात् प्रभवन्ति" भा०। "अनुभूतविषयाऽसम्प्रमोषः स्मृतिः प्रमाणादिभिरनुभूते विषयेऽसम्प्रमोषः अस्तेयः सा स्मृतिः संस्कारमात्रजन्यस्य हि ज्ञानस्य संस्कारकारणानुभवभासितो विषय आत्मीयस्तदधिकविषयपरिग्रहस्तु सम्प्रमोषः स्तेयः कस्मात् साहश्यात्। मुष-स्तेय इत्यस्मात् सम्प्रमोषपदव्युत्पत्तेः। एतदुक्तं भवति।